प्रास्थिकेऽम्भसि प्रस्थमात्रे क्वथितशीतले जले चेमं ग्राहयेत्। अतएव षड़ङ्गमभिधाय षड़ङ्गपानीयमिति वङ्गसेनादिभिरुक्तम्। अस्मिन् पक्षे चन्दनं श्वेतं ग्राह्यं न तु रक्तम्। तत्कषायलेपयोरेव प्रयोक्तुमुक्तम्। यत आह।
कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति।
षड़ङ्गपानीयमिदम्॥ * ॥ षड़ङ्गादेः पाने तु विधान्तरेण प्रक्रिया भिन्ना तामाह वङ्गसेनः।
कर्षमात्रमिह द्रव्यं ग्राहयेत् प्रास्थिकेऽम्भसि।
अर्द्धशृतं प्रयोक्तव्यं पाने पेयादिसन्निधौ॥
आदिशब्देन यूषयवागूविलेपिभक्तानि गृह्यन्ते॥*
पानप्रक्रियां शार्ङ्गधरोऽप्येनामेवाह।
क्षुण्णं द्रव्यं पलं सार्द्धं चतुःषष्टिपले जले।
अर्द्धशिष्टन्तु तद्देयं पाने पेयादिसन्निधौ॥
पानप्रयोगाश्च षड़ङ्गमुक्तवान्। अस्मिन् पक्षे चन्दनं रक्तं ग्राह्यम्। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति वचनात्॥ * ॥
अथ रक्तचन्दनस्य गुणाः।
तत्तु रक्तं हिमं स्वादु स्फर्द्दितृष्णास्रपित्तजित्।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम्॥
षड़ङ्गादि प्रयुज्यते इत्यादि शब्देन वक्ष्यमाणा योगा उच्यन्ते। ते यथा,—
श्रीपर्णीचन्दनोशीरपरूषकमधुकजम्।
पानं पित्तज्वरं हन्याच्छारिवाद्यं सशर्करम्॥
अत्र श्रीपर्णीपरूषकयोः फले ग्राह्ये। मधूकस्य तु पुष्पम्। अन्यच्च।
हन्यात् सयष्टीमधुकं तथैवोत्पलपूर्व्वकम्।
पानं शृतं हिमं किंवा सोत्पलं शर्करायुतम्॥
हन्यात् पित्तज्वरमिति शेषः। उत्पलमत्र कमलमित्यादि।
दिवास्वापं न कुर्व्वीत यतोऽसौ स्यात्कफावहः।
ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिद्ध्यते॥
उचितो हि दिवास्वापो नित्यं तेषां शरीरिणाम्।
वातादयः प्रकुप्यन्ति येषामस्वपतां दिवा॥ * ॥
येषां दिवास्वप्न उचितस्तानाह।
व्यायामप्रमदाध्ववाहनरतान् क्लान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीड़ितान्।
क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धानृषाजीर्णिनो
रात्रौ जागरितान् नरान् निरशनान् कामं दिवा स्वापयेत्॥ * ॥
अथ वातिकादिज्वराणां पाकावधिमाह।
वातिकः सप्तरात्रे तु दशरात्रेण पैत्तिकः।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥*
रसस्यामत्वेऽवधिमतिक्रम्यापि ज्वरस्तिष्ठति।
यत आह सुश्रुतः।
बहुदोषस्य मन्दाग्नेः सप्तरात्रात् परं ज्वरे।
लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते॥
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः।
कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत्॥ * ॥

ज्वरस्य तारुण्यमध्यावस्थता जीर्णतावधिः।
आसप्तरात्रात्तरुणं ज्वरमाहुर्म्मनीषिणः।
द्वादशाहमभिव्याप्य मध्यं जीर्णं ततः परम्॥
आसप्तरात्रादिति। अत्राङ् मर्य्यादायाम्। रात्रिशब्दो दिवसस्योपलक्षकः। तेन सप्तमदिवसादर्व्वाक् ज्वरस्तरुण इत्यर्थः। तथा चोक्तं तन्त्रान्तरे।
ज्वरे व्यतीते षड़हे जीर्णं इत्युच्यते बुधैरिति।
दशरात्रात् परं जीर्णमाहुरन्ये मनीषिणः।
अतएव जातूकर्णः। जीर्णस्त्रयोदशदिवस इति॥
अथ ज्वरे भेषजप्रयोगसमयः।
वातिके सप्तरात्रे तु दशरात्रेण पैत्तिके।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम्॥
सप्तरात्रे इत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः।
अतएवोक्तम्।
पाययेदातुरं साममौषधं सप्तमे दिने।
शमनेनाथ वा दृष्ट्वा निरामं तमुपाचरेदिति॥
शार्ङ्गधरेणाप्युक्तम्।
गुड़ूचीपिप्पलीमूलनागरैः पाचनं शृतम्।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनीति॥
हारीतेनाप्युक्तम्।
एतां क्रियां प्रयुञ्जीत षड़ात्रं सप्तमेऽहनि।
पिबेत् कषायसंयोगात् पेयां ज्वरविनाशिनीम्॥
एतां क्रियां लङ्घनादिरूपाम्। कषायसंयोगात् कषायेण साधितां पेयामित्यर्थः॥ खरनादेनाप्युक्तम्।
इति षड़ात्रिकः प्रोक्तो नवज्वरहरो विधिः।
ततः परं पाचनीयं शमनीयं ज्वरे हितम्॥
ततः परं सप्तमेऽहनीत्यर्थः॥ वाग्भटश्च।
सप्ताहादौषधं केचिदाहुरन्ये दशाहतः।
लघ्वन्ने भोजिते केचिद्देयमामोल्वणे न तु॥
सप्ताहात् सप्ताहमारभ्येत्यर्थः। अत्र ल्यप्लोपे कर्म्मणि पञ्चमी। अतएव सुश्रुतः।
दशरात्रात् परं सर्व्वैर्देतव्यमिति निश्चितम्।
अतएव दशरात्रेण द्वादशाहेनेति लङ्घनवता व्यतीतेनेत्यर्थः॥ अत्र चरकस्त्वेवमाह।
ज्वरितं षड़हेऽतीते लघ्वन्नं प्रतिभोजितम्।
पाचनं शमनीयं वा कषायं पाययेत्तु तम्॥
अस्यायमर्थः। ज्वरितं षड़हे लङ्घनेन व्यतीते सप्तमेऽहनि भोजितलघ्वन्नं अष्टमे दिने कषायं पाययेदित्यर्थः॥ तथा च सुश्रुतः।
सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्॥
सप्तरात्रात् परं अष्टमेऽहनीत्यर्थः। केचिच्चरकादयः। चक्रदत्तोऽपि।
सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः।
निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने॥
एवं सति कषायदाने सप्तमाष्टमयोर्दिवसयोर्व्विकल्पः॥ * ॥ तत्रापि वयोबलाग्निदोषदेशकालोचितं कुर्य्यात् भेषजमन्नञ्च दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः।
“पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते।
अचिरज्वरितस्यापि भैषज्यं दोषपाकतः॥”इति।

अस्यायमर्थः। अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकं दृष्ट्वा भैषज्यं देयम्। न तु तत्र दशरात्रापेक्षा। तथा अचिरज्वरितस्यापि पैत्तिकेतरनवज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भैषज्यं देयमित्यर्थः॥*॥ दोषपाकलक्षणमाह सुश्रुतः।
मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।
पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधमिति॥
ज्वरे मृदौ स्वल्पीभूते। मलेषु वातपित्तकफमूत्रपुरीषेषु। प्रचलेषु स्वमार्गसञ्चारिषु। पक्वं निरामम्। दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणम्। दोषाणां दुष्टवातपित्तकफानां प्रकृतिः ज्वरस्य तदुपद्रवाणां चोत्पादनम्। तस्या वैकृत्यं वैपरीत्यं तस्मात् दोषपाकज्ञानं एकेषां मते।
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम्:
दोषप्रकृतिरुत्साहो निरामज्वरलक्षणम्॥
दोषप्रकृतिः दोषाणां स्वमार्गसञ्चारः। माधवनिदाने उत्साहस्थाने अष्टाह इति पाठः॥*॥
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्।
अत्रानुक्ते प्रभातं स्यात् कषायेषु विशेषतः॥
मुख्यभेषजसम्बन्धो निषिद्धस्तरुणे ज्वरे।
तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजम्॥
मुख्यभेषजं क्वाथः तस्य सम्बन्धः पानम्।
यत आह।
न कषायं प्रशंसन्ति नराणां तरुणे ज्वरे।
कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः॥
आकुलीभूताः प्रवृद्धाः स्वमार्गं परित्यज्य यतस्ततो गताः। अत्र कषायशब्देन क्वाथो गृह्यते॥ * ॥ उक्ताश्च क्वाथस्य पर्य्यायाः।
शृतं क्वाथः कषायश्च निर्य्यूहः स निगद्यते।
तोयपेयादिसंस्कारैर्न्निर्द्दोषं तत्र भेषजमिति॥
तत्र तरुणे ज्वरे भेषजं मुख्यभेषजं क्वाथरूपम्।
तोयपेयादिसंस्कारैर्न्निर्दोषम्। यत आह।
न तु कल्पनमुद्दिश्य कषायः प्रतिषिध्यत इति।
कल्पनं तोयपेयायवाग्वादिकम्॥ * ॥ ननु।
स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्॥
इति वचनात् स्वरसादयोऽपि कथं न निषिध्यन्ते।
तन्न।
यः कषायः कषायः स्यात् स वर्ज्यस्तरुणे ज्वरे।
इति।
यः कषायः कषायः स्यात् चतुर्थभागावशेषकरणेन अष्टमभागावशेषकरणेन वा कषायवर्णः कषायरसश्च स्यात्। स कः क्वाथः। स तरुणज्वरे निषिद्धः॥ * ॥ क्वाथवाचकस्य कषायस्य लक्षणमाह।
पादशिष्टः कषायः स्याद्यः षोड़शगुणाम्भसा।
क्वथितोऽतः षड़ङ्गादि न निषिद्धो नवज्वरे॥
अस्यायमर्थः। यः क्वाथ्यद्रव्यात् षोड़शगुणेनाम्भसा क्वथितः पक्वः अथ च पादशिष्टः चतुर्थभागावशेषः स कषायः स्यात्। अतः षड़ङ्गादिस्तरुणज्वरे न निषिद्धः। अपाकादर्द्ध-